माह किन्त्वनुपलब्धिस्तु सततेन्द्रियग्राह्यत्वादनुपलब्धिग्राह्य इत्युपचर्य्यते अतस्तदनुपलब्धेरनुपलम्भादित्यादिकमहेतुः अन्यथा, त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति” वृत्तिः।

“ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम्” सू०।

“नन्वुपलब्धेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिध्येदतआह अध्यात्मम् आत्मन्यधि ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात् घटं साक्षात्करोमि वह्निमनुमिनोमि नानुमिनोमीत्येवं ज्ञानविशेषतदभावानां मनसैव सुग्रहत्वादिति भावः” वृत्तिः।

“साधर्म्यात्तुल्यधर्म्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः २२” सू०

“अनित्यसमं लक्षयति। यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात्तेन सह तुल्यधर्मतोपपद्यते शब्देऽनित्यत्वं साध्यते तदा सर्वस्यैवानित्यत्वं स्यात् सत्त्वादिरूपसाधर्म्यसम्भवात् नचेदमर्थान्तरग्रस्तमिति वाच्यं सर्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणे तात्पर्य्यात् परस्यान्वयव्यतिरेकिण एवानुमानत्वादित्याशयः तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य साध्यवत्त्वापादनमनित्यसमा २२ साध्यभेदादविशेषसमातोव्यवच्छेदस्तत्र सर्वाविशेष एवापाद्यते नतु सर्वस्य साध्यवत्त्वम्। यत्तु अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्द्देशस्तथा च अन्वर्थलक्ष्यमेव लक्षणमिति तन्न वह्निमान् धूमादित्यादौ महानससाधर्म्यस्य सत्त्वात्सर्वस्य वह्निमत्त्वं स्यादित्यस्य जात्यन्तरत्वापत्तेः। आचार्य्यास्तु साधर्म्यं वैधर्म्यस्याप्युपलक्षकं यथाकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यस्तथाकाशवैधर्म्यादाकाशभिन्नत्वादितः सर्वमेवानित्यं स्यादित्यञ्च लक्षणे यत्किञ्चिद्धर्मेणेत्येव वाच्यमित्याहुः। अत्र च वैधर्म्यस्य विपक्षावृत्तित्वान्न सर्वस्य साध्यवत्त्वापादनं किन्त्वात्मादीनामप्यनित्यत्वं स्यादिति तत्र चार्थान्तरमित्यवधेयं प्रतिकूलतर्कदेशनाभासा चेयम्” वृत्तिः।

“साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च” सू०

“अत्रोत्तरमाह। यदि यत्किञ्चित्साधर्म्यात्सर्वस्य साध्यवत्तामापादयतस्तव साधर्म्यस्यासाधकत्वमभिमतं तदा त्वत्कृतप्रतिषेधस्याप्यसिद्धिः तस्यापि प्रतिषेध्यसाधर्म्येण प्रवृत्तत्वात्त्वया ह्येवं साध्यते कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात्सत्त्वादिवत् अत्र च त्वदीयहेतुस्त्वत्प्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्त्वेन च सह साधर्म्यरूपस्तथा चायमपि न साधकः स्यात्” वृत्तिः।

“दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः” सू०

“यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितमित्यभिमतं तदा कृतकत्वे तदस्ति नतु सत्त्व इति विशेष इत्याह। साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य तस्य हेतुत्वात् साधकत्वात् तत्र हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् मदीयहेतौ सत्त्वात्साधने सत्त्वादिति नाऽविशेष इति यदुक्तं तन्न भवति” वृत्तिः।

“नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः २३” सू०

“नित्यसमं लक्षयति। अनित्यस्य भावः अनित्यत्वं तस्य नित्यं सर्वकालं स्वीकारे अनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमा २३। अयमाशयः अनित्यत्वस्य नित्यमस्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न, तस्यापि नित्यत्वापत्तिः नहि दण्डाभावदशायां दण्डीत्युच्यते अतोऽनित्यत्वस्य नित्यमेव स्वीकार इत्यभ्युपगन्तव्यं तथा च शब्दस्यापि नित्यत्वापत्तिः तेन बाधः सत्प्रतिपक्षो वा तद्देशनाभासा चेयम्। एवमनित्यत्वं यदि नित्यं कथं शब्दस्यानित्यतां कुर्यात् नहि रक्तं महारजनं परस्य नीलतां सम्पादयति अथाऽनित्यं तदा तदभावदशायां अनित्यत्वं न स्यादित्यादिकमूह्यम्। एतदनुसारेण लक्षणमपि कार्य्यमित्याचार्य्याः। वयन्तु अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमेऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात् यथा क्षितिः सकर्तृकेत्यत्र अनित्यक्षितेर्धर्मः सकर्तृकत्वं त्वया क्षितौ नित्यमुपेयते न वा न चेत् तदा साध्याभावादंशतोबाधः अथ क्षितौ नित्यमेव सकर्तृकत्वं विरुद्धं तद्देशनाभासा चेयमिति ब्रूमः” वृत्तिः।

“प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः” सू०

“अत्रोत्तरमाह। प्रतिषेध्ये मत्पक्षे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्दे अनित्यत्वमुपपद्यते न हि सम्भवति अनित्यत्वं नित्यमस्ति अथ च तन्नित्यमिति व्याघातात् नच नित्यमिति सर्वकालमित्यर्थः तथा च शब्दस्यानित्यत्वे कथं सर्वकालमनित्यत्वसम्बन्ध